BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY

THE ASIATIC SOCIETY OF BENGAL

NEW SERIES No 1209

परीक्षामुखसूत्रम्

PARĪKṢĀMUKHA-SŪTRAM.

A DIGAMBARA JAINA WORK ON LOGIC (NYĀYA)

BY

MANIKYA NANDI

TOGETHER WITH THE COMMENTARY CALLED

परीक्षामुखलघुवृत्तिः

PARĪKṢĀMUKHA-LAGHUVṚTTIḤ

BY

ANANTA VĪRYA

EDITED BY

MAHAMAHOPADHYAYA SATIS CHANDRA VIDYABHUSANA,
M.A., Ph.D.

Professor of Sanskrit and Pali, Presidency College, Calcutta, Joint Philological Secretary, Asiatic Society of Bengal and Fellow of the Calcutta University.

CALCUTTA

PRINTED AT THE BAPTIST MISSION PRESS
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET
1909

CONTENTS.

परीक्षामुखसूत्रम् ।

परीक्षामुखलघुवृत्तिः ।

INTRODUCTION.

The text of **Parīkṣāmukha sūtra** together with its commentary called **Parīkṣāmukha laghuvṛtti** printed in this fasciculus is based on three manuscripts of which one was procured from Jaipur, Rajputana, another from the Deccan College Poona and the third from the Asiatic Society of Bengal

The **Parīkṣāmukha-sūtra** is a well-known Digambara Jaina work on Logic (Nyāya) divided into six chapters which treat respectively of (1) the characteristic of valid knowledge, *pramāṇa-svarūpa* (2) *direct apprehension or perception pratyakṣa* (3) *indirect* apprehension, *parokṣa* (4) object of valid knowledge, *viṣaya*, (5) the result of valid knowledge, *phala* and (6) the semblances or fallacies, *ābhāsa*

The author of the Sūtra is named Māṇikya Nandi[1] or Ratna Nandi, who belonged to the Digambara sect. In chapter vi of the work he mentions the Bauddha,[3] Mīmāṃsaka,[4] Sāṃkhya,[5] Laukāyatika,[6] Saugata,[7] Yauga,[8] Prābhakara[9] and Jaiminīya[10] systems of philosophy. In chapter iii he refers to a certain philosopher[11] who distinguishes three phases of the reason or middle term This philosopher is evidently Dharmakīrti who divides the reason or

---

[1] देवस्य सम्मतमपास्तसमस्तदोष
वौद्ध्य प्रपञ्चरचितं रचित समस्त
माणिक्यनन्दिविभुना शिशुबोधहेतोः
मानस्वरूपमधुना स्फुटमभ्यधायि ॥ (Parīksāmukha laghuvṛtti, chapter i p 13)

[2] प्रत्यक्षेतरभेदभिन्नममलं मानं द्विधेवोदितं
देवैर्दिव्यगुणै विचार्य विधिवत सख्यानतः संप्रहात् ।
मानानामिति तद्विगम्यभिहित श्रारतमन्याकृदैः
सख्याख्यानमदो विशुद्धधिषणै बोद्धव्यमव्याहतम् ॥ (Parīksāmukha laghuvṛtti, chapter ii, p 25)

[3] Aphorism 6 [4] Aphorism 7, 13 [5] Aphorism 27, 57.
[6] Aphorism 56 [7] Aphorism 57 [8] Aphorism 57.
[9] Aphorism 57 [10] Aphorism 57

[11] को वा त्रिधा हेतुमुक्त्वा समर्थयमानो न पक्षयति (Parīksāmukha sūtra, chap iii aph. 31).

middle term[1] **into three kinds according to the relation which it bears to the major term.**

Manikya Nandi is stated in the **Parīkṣāmukha laghuvṛtti** to have got his inspiration in Logic from Akalanka Deva[2] (often called simply Akalanka[3] or Deva[4]) who flourished about 750 A.D.[5] The approximate date in which Manikya Nandi lived is 800 A.D.[6]

The **Parīksâmukha laghuvrtti** is also known by the names of **Parīkṣāmukha-pañjikā** and **Prameyaratnamâlā**[8] It is the work of a Digambara logician named Anantavīrya,[9] the famous author of a gloss on Akalanka's **Nyayavinıscaya** called **Nyāyavinıscaya-vṛtti.** Anantavīrya observes that it was at the request of Hirapa, the beloved son of Vaijeya that he undertook for the sake of Śantisena to write the **Parīksāmukha pañjika.**[10] Now, Śāntisena, supposed be identical with Śanti Sūri died in samvat 1096 or A D 1039[11] His contemporary Anantavirya must, therefore have flourished

[1] त्रीण्येव च लिङ्गानि । अनुपलब्धिः स्वभावकार्ये चेति (Dharmakīrti's Nyāyabindu Peterson's edition chap ii, p 104)

अकलङ्कवचोऽम्भोधेरुद्दध्रे येन धीमता
न्यायविद्यामृतं तस्मै नमो माणिक्यनन्दिने ॥ (Parīksāmukha laghuvrtti chap i, opening lines)

अकलङ्कशशाङ्कैर्यत् प्रकटीकृतमखिलमाननिभनिकरम्
तत् संक्षिप्तं सूरिभिरुरुमतिभिर्व्यक्तमेतेन ॥ (Parīksāmukha laghuvṛtti chap vi p 54)

[4] सूक्ष्मार्थमस्य वाचां प्रत्यक्षमुपदर्शितम्
देवागमोपजीविभिः सूरिभिः स्थापितं यथा ॥ (Parīksāmukha laghuvṛtti, chap ii p 25)

[5] [6] *Vide* my History of the Medieval School of Indian Logic published by the Calcutta University pp 26 28

[7] *Vide* footnote 10

[8] इति प्रमेयरत्नमालापरनामधेया परीक्षामुखवृत्तिः समाप्ता ॥ (Parīksāmukha laghuvṛtti chap vi p 55)

[9] तस्योपरोधवशतो विशदोरुकीर्तेः
माणिक्यनन्दिकृतशास्त्रमगाधबोधम् ।
स्पष्टीकृतं कतिपयैर्वचनैरुदारै
र्बालप्रबोधकरमेतदनन्तवीर्यैः ॥ (Parīksāmukha laghuvrtti chap vi p 55)

[10] वैजेयप्रियपुत्रस्य हीरपस्योपरोधतः ।
शान्तिषेणार्थमारब्धा परीक्षामुखपञ्जिका ॥ (Parīksāmukha laghuvṛtti, opening lines)

[11] *Vide* the Indian Antiquary, vol xi p 253, and Dr R G Bhandarkar's Report on Sanskrit MSS during 1883 84 p 129

about that time. He lived undoubtedly before the 14th century A.D., for he is mentioned by Mādhavācārya in the **Sarvadarśana-saṁgraha** (chapter on Jaina darśana).

In the **Parīkṣāmukha-laghuvṛtti** Anantavīrya mentions numerous philosophers and philosophical systems and quotes several important couplets which have yet to be identified. It is interesting to note that Vidyānanda's **Āptaparīkṣā**[1] is mentioned as an old work while his **Āptamīmāṁsālaṅkāra** (also called **Aṣṭasāhasrī**) is designated as **Devāgamālaṅkāra**[2] or simply **Alaṅkāra.**[3]

Besides Anantavīrya's work, there is another very excellent commentary on the **Parīksâmukha-sūtra** called **Prameya-kamala mārtaṇḍa** by a Digambara logician named Prabhacandra whose date is generally assigned at the first quarter of the 9th century A.D.[4] Prabhācandra who was a disciple of Padma Nandi[5] speaks of Māṇikya Nandi[6] and Akalanka Deva[7] in very high terms.

Presidency College,
Calcutta, May, 1909.

SATIS CHANDRA VIDYABHUSANA

[1] तदुक्तमत्र पुरातनैः विस्तरेणाभिहितम् आप्तपरीक्षादौ (Parīksāmukha laghuvṛtti, chap ii p 23)

[2] अपरमप्यत्र विस्तरेण देवागमालङ्कारे चिन्तितमिति नेह प्रतन्यते (Parīkṣāmukha laghuvṛtti, chap ii, p. 24).

[3] विस्तरेणैतदलङ्कारे प्रतिपादितं बोद्धव्यम् (Parīksāmukha laghuvṛtti, chap ii, p 17)

[4] *Vide* my "History of the Mediæval School of Indian Logic" published by the Calcutta University pp. 33 34

[5] गुरुः श्रीपद्मनन्दिसिद्धान्तिशिष्योऽनेकगुणालयः
प्रभाचन्द्रश्चिरं जीयाद्रत्ननन्दिपदे रतः ॥ (Prameyakamala mārtaṇḍa, MSS. of A S B, chap vi, p 418)

[6] शास्त्रं करोमि वरमल्पतरावबोधो
माणिक्यनन्दिपदपङ्कजसत्प्रसादात् ॥ (Prameyakamala mārtaṇḍa, MSS of A S B chap i, p 1)

[7] श्रीमदकलङ्कार्थोऽव्युत्पन्नप्रज्ञैरवगन्तुं न शक्यते इति तद्व्युत्पादनाय करतलामलकवदर्थमुद्धृत्य प्रतिपादयितुकामस्तत्परिज्ञानानुग्रहे वा प्रेरितस्तदर्थप्रतिपादनप्रवणं प्रकरणमिदमाचार्यः प्राह (Prameyakamala-mārtaṇḍa, MSS. of A S.B., chap. i, p. 1)

परीक्षामुखसूत्रम् ।

प्रमाणादर्थसंसिद्धिस्तदाभासाद्विपर्ययः ।
इति वक्ष्ये तयोर्लक्ष्म सिद्धमल्पं लघीयसः[1] ॥

स्वापूर्वार्थव्यवसायात्मकं ज्ञानं प्रमाणम् ॥१॥ हिताहितप्राप्तिपरिहारसमर्थं हि प्रमाणं ततो ज्ञानमेव तत् ॥२॥ तन्निश्चयात्मकं समारोपविरुद्धत्वादनुमानवत् ॥३॥ अनिश्चितोऽपूर्वार्थः ॥४॥ दृष्टोऽपि समारोपात्तादृक् ॥५॥ स्वोन्मुखतया प्रतिभासनं स्वस्य व्यवसायः ॥६॥ अर्थस्येव तदुन्मुखतया ॥७॥ घटमहमात्मना वेद्मि ॥८॥ कर्मवत्कर्तृकरणक्रियाप्रतीतेः ॥९॥ शब्दानुच्चारणेऽपि स्वस्यानुभवनमर्थवत् ॥१०॥ को वा तत्प्रतिभासिनमर्थमध्यक्षमिच्छंस्तदेव तथा नेच्छेत् ॥११॥ प्रदीपवत् ॥१२॥ तत्प्रामाण्यं स्वतः परतश्च ॥१३॥

इति प्रमाणस्य स्वरूपोद्देशः प्रथमः ॥१॥

तद्द्वेधा ॥१॥ प्रत्यक्षेतरभेदात् ॥२॥ विशदं प्रत्यक्षम् ॥३॥ प्रतीत्यन्तराव्यवधानेन विशेषवत्तया वा प्रतिभासनं वैशद्यम् ॥४॥ इन्द्रियानिन्द्रियनिमित्तं देशतः सांव्यवहारिकम् ॥५॥ नार्थालोकौ कारणे परिच्छेद्यत्वात्तमोवत् ॥६॥ तदन्वयव्यतिरेकानुविधानाभावाच्च केशोण्डुकज्ञानवन्नक्तंचरज्ञानवच्च ॥७॥ अतज्जन्यमपि तत्प्रकाशकं प्रदीपवत् ॥८॥ स्वावरणक्षयोपशमलक्षणयोग्यतया हि प्रतिनियतमर्थं व्यवस्थापयति ॥९॥ कारणस्य च परिच्छेद्यत्वे करणादिना व्यभिचारः ॥१०॥ सामग्रीविशेषविश्लेषिताखिलावरणमतीन्द्रियमशेषतो मुख्यम् ॥११॥ सावरणत्वे करणजन्यत्वे च प्रतिबन्धसम्भवात् ॥१२॥

इति प्रत्यक्षोद्देशो द्वितीयः ॥२॥

---

[1] लघीयसो विनेयानुद्दिश्य । इति टीका ।

परोक्षमितरत् ॥१॥ प्रत्यक्षादिनिमित्तं स्मृतिप्रत्यभिज्ञानतर्कानुमानागमभेदम् ॥२॥ संस्कारोद्बोधनिबन्धना तदित्याकारा स्मृतिः ॥३॥ स देवदत्तो यथा ॥४॥ दर्शनस्मरणकारणकं सङ्कलनं प्रत्यभिज्ञानं तदेवेदं तत्सदृशं तद्विलक्षणं तत्प्रतियोगीत्यादि ॥५॥ यथा स एवायं देवदत्तः गोसदृशो गवयः गोविलक्षणो महिषः इदमस्माद्दूरं वृक्षोऽयमित्यादि ॥६॥ उपलम्भानुपलम्भनिमित्तं व्याप्तिज्ञानमूहः इदमस्मिन् सत्येव भवत्यसति न भवत्येवेति च ॥७॥ यथाग्नावेव धूमस्तदभावे न भवत्येवेति च ॥८॥ साधनात् साध्यविज्ञानमनुमानम् ॥९॥ साध्याविनाभावित्वेन निश्चितो हेतुः ॥१०॥ सहक्रमभावनियमोऽविनाभावः ॥११॥ सहचारिणोर्व्याप्यव्यापकयोश्च सहभावः ॥१२॥ पूर्वोत्तरचारिणोः कार्यकारणयोश्च क्रमभावः ॥१३॥ तर्कात्तन्निर्णयः ॥१४॥ इष्टमबाधितमसिद्धं साध्यम् ॥१५॥ सन्दिग्धविपर्यस्ताव्युत्पन्नानां साध्यत्वं यथा स्यादित्यसिद्धपदम् ॥१६॥ अनिष्टाध्यक्षादिबाधितयोः साध्यत्वं माभूदिति इष्टाबाधितवचनम् ॥१७॥ न चासिद्धवदिष्टं प्रतिवादिनः ॥१८॥ प्रत्यायनाय हीच्छा वक्तुरेव ॥१९॥ साध्यं धर्मः क्वचित्तद्विशिष्टो वा धर्मी ॥२०॥ पक्ष इति यावत् ॥२१॥ प्रसिद्धो धर्मी ॥२२॥ विकल्पसिद्धे तस्मिन् सत्तेतरे साध्ये[१] ॥२३॥ अस्ति सर्वज्ञो नास्ति खरविषाणम् ॥२४॥ प्रमाणोभयसिद्धे तु साध्यधर्मविशिष्टता ॥२५॥ अग्निमानयं देशः परिणामी शब्द इति यथा ॥२६॥ व्याप्तौ तु साध्यं धर्म एव ॥२७॥ अन्यथा तदघटनात् ॥२८॥ साध्यधर्माधारसन्देहापनोदाय गम्यमानस्यापि पक्षस्य वचनम् ॥२९॥ साध्यधर्मिणि साधनधर्मावबोधनाय पक्षधर्मोपसंहारवत् ॥३०॥ को वा त्रिधा हेतुमुक्त्वा समर्थयमानो न पक्षयति ॥३१॥ एतद्द्वयमेवानुमानाङ्गं नोदाहरणम् ॥३२॥ न हि तत्साध्यप्रतिपत्त्यङ्गं तत्र यथोक्तहेतोरेव व्यापारात् ॥३३॥ तदविनाभावनिश्चयार्थं वा विपक्षे बाधकादेव तत्सिद्धेः ॥३४॥ व्यक्तिरूपं च निदर्शनं सामान्येन तु व्याप्तिस्तत्रापि तद्विप्रतिपत्तावनवस्थानं स्याद्दृष्टान्तान्तरापेक्षणात् ॥३५॥ नापि

---

[१] सत्ता च तदपेक्षयेतराऽसत्ता च ते द्वे । इति टीका ।

व्याप्तिस्मरणार्थं तथाविधहेतुप्रयोगादेव तत्स्मृतेः ॥३६॥ तत्परमभिधीय-
मानं साध्यधर्मिणि साध्यसाधने सन्देहयति ॥३७॥ कुतोऽन्यथोपनयनिगमने ॥३८॥
न च ते तदङ्गे साध्यधर्मिणि हेतुसाध्ययोर्वचनादेवासंशयात् ॥३९॥ समर्थनं
वा वरं हेतुरूपमनुमानावयवो वास्तु साध्ये तदुपयोगात् ॥४०॥ बालव्युत्पत्त्यर्थं
तत्त्रयोपगमे शास्त्र एवासौ न वादेऽनुपयोगात् ॥४१॥ दृष्टान्तो द्वेधान्वय-
व्यतिरेकभेदात् ॥४२॥ साध्यव्याप्तं साधनं यत्र प्रदर्श्यते सोऽन्वयदृष्टान्तः ॥४३॥
साध्याभावे साधनाभावो यत्र कथ्यते स व्यतिरेकदृष्टान्तः ॥४४॥ हेतोरुप-
संहार उपनयः ॥४५॥ प्रतिज्ञायास्तु निगमनम् ॥४६॥ तदनुमानं द्वेधा ॥४७॥
स्वार्थपरार्थभेदात् ॥४८॥ स्वार्थमुक्तलक्षणम् ॥४९॥ परार्थं तु तदर्थपरामर्शि-
वचनाज्जातम् ॥५०॥ तद्वचनमपि तद्धेतुत्वात् ॥५१॥ स हेतुर्द्वेधोपलब्ध्यनुप-
लब्धिभेदात् ॥५२॥ उपलब्धिर्विधिप्रतिषेधयोरनुपलब्धिश्च ॥५३॥ अविरुद्धोप-
लब्धिर्विधौ षोढा व्याप्यकार्यकारणपूर्वोत्तरसहचारभेदात् ॥५४॥ रसादेक-
सामग्र्यनुमानेन रूपानुमानमिच्छद्भिरिष्टमेव किञ्चित्कारणं हेतुर्यत्र सामर्थ्या-
प्रतिबन्धकारणान्तरावैकल्ये[1] ॥५५॥ न च पूर्वोत्तरचारिणोस्तादात्म्यं तदुत्पत्तिर्वा
कालव्यवधाने तदनुपलब्धेः ॥५६॥ भाव्यतीतयोर्मरणजाग्रद्बोधयोरपि नारि-
ष्टोद्बोधौ प्रति हेतुत्वम् ॥५७॥ तद्व्यापाराश्रितं हि तद्भावभावित्वम् ॥५८॥
सहचारिणोरपि परस्परपरिहारेण व्यवस्थानात् सहोत्पादाच्च ॥५९॥ परिणामी
शब्दः कृतकत्वाद् य एवं स एवं दृष्टो यथा घटः कृतकश्चायं तस्मात्परिणामीति
यस्तु न परिणामी स न कृतको दृष्टो यथा वन्ध्यास्तनंधयः कृतकश्चायं
तस्मात्परिणामी ॥६०॥ अस्त्यत्र देहिनि बुद्धिः व्यापारादेः[2] ॥६१॥ अस्त्यत्र
छाया छत्रात् ॥६२॥ उदेष्यति शकटं कृत्तिकोदयात् ॥६३॥ उदगाद्भरणिः
प्राक्तत एव ॥६४॥ अस्त्यत्र मातुलिंगे रूपं रसात् ॥६५॥ विरुद्धतदुपलब्धिः
प्रतिषेधे तथा ॥६६॥ नास्त्यत्र शीतस्पर्श उष्णात् ॥६७॥ नास्त्यत्र शीतस्पर्शो

---

[1] यत्र सामर्थ्याप्रतिबन्धःकारणान्तरावैकल्यञ्च निश्चीयते । इति टीका ।

[2] व्याहारादेः । इति पाठान्तरम् ।

धूमात् ॥६८॥ नास्मिन् शरीरिणि सुखमस्ति हृदयशल्यात् ॥६९॥ नोदेष्यति मुहूर्तान्ते शकटं रेवत्युदयात् ॥७०॥ नोदगाद्भरणी मुहूर्तात्पूर्वं पुष्योदयात् ॥७१॥ नास्त्यत्र भित्तौ परभागाभावोऽर्वाग्भागदर्शनात् ॥७२॥ अविरुद्धानुपलब्धिः प्रतिषेधे सप्तधा स्वभावव्यापककार्यकारणपूर्वोत्तरसहचारानुपलम्भभेदात् ॥७३॥ नास्त्यत्र भूतले घटोऽनुपलब्धेः ॥७४॥ नास्त्यत्र शिंशपा वृक्षानुपलब्धेः ॥७५॥ नास्त्यत्राप्रतिबद्धसामर्थ्योऽग्निर्धूमानुपलब्धेः ॥७६॥ नास्त्यत्र धूमोऽनग्नेः ॥७७॥ न भविष्यति मुहूर्तान्ते शकटं कृत्तिकोदयानुपलब्धेः ॥७८॥ नोदगाद्भरणिर्मुहूर्तात् प्राक्त एव ॥७९॥ नास्त्यत्र समतुलायामुन्नामो नामानुपलब्धेः ॥८०॥ विरुद्धानुपलब्धिर्विधौ त्रेधा विरुद्धकार्यकारणस्वभावानुपलब्धिभेदात् ॥८१॥ यथास्मिन् प्राणिनि व्याधिविशेषोऽस्ति निरामयचेष्टानुपलब्धेः ॥८२॥ अस्त्यत्र देहिनि दुःखमिष्टसंयोगाभावात् ॥८३॥ अनेकान्तात्मकं वस्त्वेकान्तस्वरूपानुपलब्धेः ॥८४॥ परम्परया संभवत्साधनमत्रैवान्तर्भावनीयम् ॥८५॥ अभूदत्र चक्रे शिवकः स्थासात् ॥८६॥ कार्य्यकार्यमविरुद्धकार्योपलब्धौ ॥८७॥ यथा नास्त्यत्र गुहायां मृगक्रीडनं मृगारिसंशब्दनात् कारणविरुद्धकार्यं विरुद्धकार्योपलब्धौ यथा ॥८८॥ व्युत्पन्नप्रयोगस्तु तथोपपत्त्यान्यथानुपपत्त्यैव वा ॥८९॥ अग्निमानयं देशस्तथैव धूमवत्त्वोपपत्तेर्धूमवत्त्वान्यथानुपपत्तेर्वा ॥९०॥ हेतुप्रयोगो हि यथा व्याप्तिग्रहणं विधीयते सा च तावन्मात्रेण व्युत्पन्नैरवधार्यते ॥९१॥ तावता च साध्यसिद्धिः ॥९२॥ तेन पक्षस्तदाधारसूचनायोक्तः ॥९३॥ आप्तवाक्यादिनिबन्धनमर्थज्ञानमागमः ॥९४॥ सहजयोग्यतासङ्केतवशाद्धि शब्दादयो वस्तुप्रतिपत्तिहेतवः ॥९५॥ यथा मेर्वादयः सन्ति ॥९६॥

इति परोक्षोद्देशः तृतीयः ॥३॥

सामान्यविशेषात्मा तदर्थो विषयः ॥१॥ अनुवृत्तव्यावृत्तप्रत्ययगोचरत्वात्पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामेनार्थक्रियोपपत्तेश्च ॥२॥

सामान्यं द्वेधा तिर्यगूर्द्धताभेदात् ॥ ३ ॥ सदृशपरिणामस्तिर्यक् खण्डमुण्डादिषु गोत्ववत् ॥४॥ परापरविवर्त्तव्यापिद्रव्यमूर्द्धता मृदिव स्थासादिषु ॥५॥ विशेषश्च ॥ ६ ॥ पर्यायव्यतिरेकभेदात् ॥ ७ ॥ एकस्मिन्द्रव्ये क्रमभाविनः परिणामपर्याया आत्मनि हर्षविषादादिवत् ॥ ८ ॥ अर्थान्तरगतो विसदृशपरिणामो व्यतिरेको गोमहिषादिवत् ॥९॥

इति प्रमाणस्य विषयोद्देशः चतुर्थः ॥४॥

अज्ञाननिवृत्तिर्हानोपादानोपेक्षाश्च फलम् ॥ १ ॥ प्रमाणादभिन्नं भिन्नं च ॥ २ ॥ यः प्रमिमीते स एव निवृत्ताज्ञानो जहात्यादत्ते उपेक्षते चेति प्रतीतेः ॥ ३ ॥

इति प्रमाणस्य फलोद्देशः पञ्चमः ॥५॥

ततोऽन्यत् तदाभासम् ॥ १ ॥ अस्वसंविदितगृहीतार्थदर्शनसंशयादयः प्रमाणाभासाः ॥ २ ॥ स्वविषयोपदर्शकत्वाभावात् ॥ ३ ॥ पुरुषान्तरपूर्वार्थ-गच्छत्तृणस्पर्श-स्थाणुपुरुषादिज्ञानवत् ॥ ४ ॥ चक्षूरसयोर्द्रव्ये संयुक्तसमवायवच्च ॥ ५ ॥ अवैशद्ये प्रत्यक्षं तदाभासं बौद्धस्याकस्माद्धूमदर्शनाद्वह्निविज्ञानवत् ॥ ६ ॥ वैशद्येऽपि परोक्षं तदाभासं मीमांसकस्य करणज्ञानवत् ॥ ७ ॥ अतस्मिंस्तदिति ज्ञानं स्मरणाभासं जिनदत्ते स देवदत्तो यथा ॥ ८ ॥ सदृशे तदेवेदं तस्मिन्नेव तेन सदृशं यमलकवत् इत्यादि प्रत्यभिज्ञानाभासम् ॥ ९ ॥ असंबद्धे तद्ज्ञानं तर्काभासं यावांस्तत्पुत्रः स श्यामः ॥ १० ॥ इदमनुमानाभासम् ॥ ११ ॥ तत्रानिष्टादिः पक्षाभासः ॥ १२ ॥ अनिष्टो मीमांसकस्यानित्यः शब्दः ॥ १३ ॥ सिद्धः श्रावणः शब्दः ॥ १४ ॥ बाधितः प्रतिज्ञानुमानागमलोकस्ववचनैः ॥ १५ ॥ तत्र प्रत्यक्षबाधितो यथाऽनुष्णोऽग्निर्द्रव्यत्वाज्जलवत् ॥ १६ ॥ अपरिणामी शब्दः कृतकत्वाद् घटवत् ॥ १७ ॥ प्रेत्यासुखप्रदो धर्मः पुरुषाश्रितत्वादधर्मवत् ॥ १८ ॥ शुचि नरशिरःकपालं प्राण्यंगत्वाच्छङ्खशुक्तिवत् ॥ १९ ॥ माता मे वन्ध्या पुरुषसंयोगेऽप्यगर्भत्वात् प्रसिद्धवन्ध्यावत् ॥२०॥ हेत्वाभासा असिद्धविरुद्धानैकान्तिकाकिञ्चित्कराः ॥२१॥

असत्सत्तानिश्चयोऽसिद्धः ॥२२॥ अविद्यमानसत्ताकः परिणामी शब्दश्चाक्षुषत्वात् ॥ २३ ॥ [1]स्वरूपेणैवासिद्धत्वात् ॥ २४ ॥ अविद्यमाननिश्चयो मुग्धबुद्धिं प्रति अग्निरत्र धूमात् ॥२५॥ तस्य वाष्पादिभावेन भूतसङ्घाते सन्देहात् ॥२६॥ साङ्ख्यं प्रति परिणामी शब्दः कृतकत्वात् ॥ २७ ॥ तेनाज्ञातत्वात् ॥ २८ ॥ विपरीतनिश्चिताविनाभावो विरुद्धः अपरिणामी शब्दः कृतकत्वात् ॥ २९ ॥ विपक्षेऽप्यविरुद्धवृत्तिरनैकान्तिकः ॥३०॥ निश्चितवृत्तिरनित्यः शब्दः प्रमेयत्वाद् घटवत् ॥३१॥ आकाशे नित्येऽप्यस्य निश्चयात् ॥३२॥ शङ्कितवृत्तिस्तु नास्ति सर्वज्ञो वक्तृत्वात् ॥३३॥ सर्वज्ञत्वेन वक्तृत्वाविरोधात् ॥३४॥ सिद्धे प्रत्यक्षादिबाधिते च साध्ये हेतुरकिञ्चित्करः ॥३५॥ सिद्धः श्रावणः शब्दः शब्दत्वात् ॥३६॥ किञ्चिदकरणात् ॥३७॥ यथानुष्णोऽग्निर्द्रव्यत्वात् इत्यादौ किञ्चित्कर्तुमशक्यत्वात् ॥ ३८ ॥ लक्षण एवासौ दोषो व्युत्पन्नप्रयोगस्य पक्षदोषेणैव दुष्टत्वात् ॥३९॥ दृष्टान्ताभासा अन्वये असिद्धसाध्यसाधनोभयाः ॥४०॥ अपौरुषेयः शब्दो मूर्त्तत्वादिन्द्रियसुखपरमाणुघटवत् ॥४१॥ विपरीतान्वयश्च यदपौरुषेयं तदमूर्त्तम् ॥४२॥ विद्युदादिनातिप्रसङ्गात् ॥४३॥ व्यतिरेके सिद्धतद्व्यतिरेकाः परमाण्विन्द्रियसुखाकाशवत् ॥ ४४॥ विपरीतव्यतिरेकश्च यन्नामूर्त्तं तन्नापौरुषेयम् ॥४५॥ बालप्रयोगाभासः पञ्चावयवेषु कियद्धीनता ॥४६॥ अग्निमानयं देशो धूमवत्त्वाद्यदित्थं तदित्थं यथा महानसम् ॥४७॥ धूमवांश्चायमिति वा ॥४८॥ तस्मादग्निमान् धूमवांश्चायम् ॥४९॥ स्पष्टतया प्रकृतप्रतिपत्तेरयोगात् ॥५०॥ रागद्वेषमोहाक्रान्तपुरुषवचनाज्जातमागमाभासम् ॥५१॥ यथा नद्यास्तीरे मोदकराशयः सन्ति धावध्वं माणवकाः ॥५२॥ अङ्गुल्यग्रे हस्तियूथशतमास्ते इति च ॥५३॥ विसंवादात् ॥५४॥ प्रत्यक्षमेवैकं प्रमाणमित्यादिसङ्ख्याभासम् ॥५५॥ लौकायतिकस्य प्रत्यक्षतः परलोकादिनिषेधस्य परबुद्ध्यादेश्चासिद्धेरतद्विषयत्वात् ॥ ५६ ॥ सौगतसाङ्ख्ययौगप्राभाकरजैमिनीयानां प्रत्यक्षानुमानागमोपमानार्थापत्त्यभावैरेकैकाधिकैर्व्याप्तिवत् ॥५७॥ अनु-

[1] स्वरूपेणासत्त्वात् । इति पाठान्तरम् ।

मानादेस्तद्विषयत्वे प्रमाणान्तरत्वम् ॥५८॥ तर्कस्येव व्याप्तिगोचरत्वेऽप्रमाणान्तरत्वं अप्रमाणस्याव्यवस्थापकत्वात् ॥६०॥ विषयाभासः सामान्यं विशेषो द्वयं वा स्वतन्त्रम् ॥६१॥ तथा प्रतिभासनात्कार्य्याकारणाच्च ॥६२॥ समर्थस्य करणे सर्वदोत्पत्तिरनपेक्षत्वात् ॥६३॥ परापेक्षणे परिणामित्वमन्यथा तदभावात् ॥६४॥ स्वयमर्थस्याकारकत्वात्पूर्ववत् ॥६५॥ फलाभासं प्रमाणादभिन्नं भिन्नमेव वा ॥६६॥ अभेदे तद्व्यवहारानुपपत्तेः ॥६७॥ व्यावृत्त्यापि न तत्कल्पना फलान्तराद्व्यावृत्त्या फलत्वप्रसङ्गात् ॥६८॥ प्रमाणान्तराद्व्यावृत्त्येवाप्रमाणत्वस्य ॥६९॥ तस्मादवास्तवो भेदः ॥७०॥ भेदेत्वात्मान्तरवत्तदनुपपत्तेः ॥७१॥ समवायेऽतिप्रसङ्गः ॥७२॥ प्रमाणतदाभासौ दुष्टतयोद्भावितौ परिहृतापरिहृतदोषौ वादिनः साधनतदाभासौ प्रतिवादिनो दूषणभूषणे च ॥७३॥ सम्भवदन्यद्विचारणीयम् ॥७४॥

इति परीक्षामुखस्याभासोद्देशः षष्ठः ॥६॥

परीक्षामुखमादर्शं हेयोपादेयतत्त्वयोः ।
संविदे मादृशो बालः परीक्षादक्षवद्व्यधाम् ॥

इति श्रीमाणिक्यनन्दिविरचितानि परीक्षामुखसूत्राणि समाप्तानि ।
सू सं. ॥२०७॥